# ॥ આગમરહસ્યે રેણુકાસ્તોત્રમ્ ॥

.. Renuka Stotram from Agam rahasya ..

sanskritdocuments.org

May 21, 2017

# .. Renuka Stotram from Agam rahasya ..

# ॥ આગમરહસ્યે રેણુકાસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : reNukAstotraM Agamarahasye

File name : reNukAstotramAgamarahasye.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Latest update : June 18, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

# ॥ આગમરહસ્યે રેણુકાસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ।
શ્રીરેણુકાયૈ નમઃ ।

ભૈરવી ઉવાચ

દેવ દેવ મહેશાન મહાદેવ દયાનિધે ।
યત્ત્વયા પઠ્યતે નાથ રેણુકાસ્તોત્રમુત્તમમ્ ॥

હ્રીં રેણુકાયૈ વિદ્મહે રામમાત્રે ચ ધીમહિ । તન્નો ગૌરી પ્રચોદયાત્ ॥

ઇતિ શ્રીરેણુકાગાયત્રીમન્ત્રઃ ।

તદહં શ્રોતુમિચ્છામિ સર્વકામસમૃદ્ધિદમ્ ।
સર્વાર્થસાધકં દિવ્યં સાધકનાં સુખાવહમ્ ॥

મહાભૈરવ ઉવાચ

શૃણુ દેવિ પ્રવક્ષ્યામિ રેણુકા સ્તોત્રમુત્તમમ્ ।
યસ્ય સ્મરણમાત્રેણ સર્વાન્ કામાનવાપ્નુયાત્ ॥

સ્તોત્રસ્યાસ્ય ઋષિઃ સોઽહં છન્દોઽનુષ્ટુપ્પ્રકીર્તિતમ્ ।
દેવતા તુ પરાશક્તિઃ રેણુકા જગદમ્બિકા ॥

ન્યાસં જાલં તથા ધ્યાનં મૂલમન્ત્રેણ વૈ ચરેત્ ।

ધ્યાનમ્

મધ્યે બદ્ધમયૂરપિચ્છનિકરાં શ્યામાં પ્રબાલાધરાં
ગુઞ્જાહારધરાં ધનુષ્શરકરાં નીલામ્બરામમ્બરામ્ ।
શૃઙ્ગીવાદનતત્પરાં સુનયનાં મૂર્દ્ધાલકૈર્બર્બરાં
ભિલ્લીવેષધરાં નમામિ શબરીં ત્વામેકવીરાં પરામ્ ॥

માનસે યોનિમુદ્રાં પ્રદર્શ્ય /-/-

ૐ હ્રીઙ્કારરૂપિણી દેવી રેણુકા સુખદાયિની ।
ક્લીઙ્કારરૂપિણી શ્રદ્ધા સિદ્ધિસૌભાગ્યદાયિની ॥

વાગ્ભવા કામરૂપા ચ કામકલ્લોલમાલિની ।
ષડ્બીજા ચ ત્રિબીજા ચ નવબીજા ન વા નવા ॥

નવભૈરવપૂજ્યા ચ નવમી નવ વલ્લભા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ રેણુકાયૈ નમો નમઃ ॥

ચૈતન્યરૂપિણી વિદ્યા નિર્ગુણા ગુણપારગા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ રેણુકાયૈ નમો નમઃ ॥

પ્રપઞ્ચરહિતા પૃથ્વી લક્ષણાતીતવિગ્રહા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ રેણુકાયૈ નમો નમઃ ॥

યા કામધેનુઃ સકલાર્થદાત્રી  સર્વેશ્વરી સર્વભયાપહન્ત્રી ।
યા સચ્ચિદાનન્દકરી જનાનાં સા રેણુકા પાતુ નિરન્તરં મામ્  ॥

યા રામમાતા રમણીયરૂપા રમાધવાદ્યૈરભિપૂજિતાન્ઘ્રિઃ ।
નિત્યોત્સવા નિર્જરવન્દિતા ચ સા રેણુકા પાતુ નિરન્તરં મામ્  ॥

યા કાલરાત્રિઃ કલિકલ્મષઘ્ની કલ્યાણશૈલામલવાસવાસા ।
યોગેશ્વરારાધિતપાદપદ્મા સા રેણુકા પાતુ નિરન્તરં મામ્  ॥

યા ભર્ગપત્ની ભવરોગહન્ત્રી ભક્તેશ્વરી ભક્તજનાભિનન્દિની ।
ભવ્યા ભવાની ભવપૂજિતા યા સા રેણુકા પાતુ નિરન્તરં મામ્  ॥

યા એકલાઽનેકશરીરધારિણી દિવ્યામ્બરા દિવ્યસુરત્વપૂજિતા ।
શિવાઽપરા સર્વસુખૈકભૂમિદા સા રેણુકા પાતુ નિરન્તરં મામ્ ॥

નમસ્તે રામમાત્રે તે નમઃ કલ્યાણદાયિની ।
નમઃ સકલસઙ્ધાત્ર્યૈ રેણુકાયૈ નમોઽસ્તુ તે ॥

બ્રહ્મરૂપે નમસ્તેઽસ્તુ નમસ્તે શિવરૂપિણી ।
વિષ્નુરૂપે નમસ્તેઽસ્તુ રેણુકાયૈ નમોઽસ્તુ તે ॥

સર્વશક્ત્યૈ નમસ્તેઽસ્તુ સર્વવ્યાપિણિ સર્વદા ।
સર્વાર્થસાધિકે નિત્યં રેણુકાયૈ નમોઽસ્તુ તે ॥

નમો નમસ્તે ભૈરવ્યૈ ભવભીતિનિવારિણી ।
ભવાન્યૈ ભક્તવશ્યાયૈ રેણુકાયૈ નમોઽસ્તુ તે ॥

વિશ્વાધારે વિશ્વમયે વિશ્વેશ્વરવિલાસિની ।
વિશ્વમ્ભરિ વિશાલાક્ષિ રેણુકાયૈ નમોઽસ્તુ તે ॥

કમલે કમલાવાસે કમલોદ્ભવપૂજિતે ।
કામદે કામવરદે રેણુકાયૈ નમોઽસ્તુ તે ॥

વિશ્વબીજે વિરાટાયૈ વિરજામ્બરધારિણિ ।
યન્ત્રેશ્વરિ મહામાયે રેણુકાયૈ નમોઽસ્તુ તે ॥

નિખિલનિગમગીતે શમ્ભુવામાઙ્કસંસ્થે
શરણજનસુતારે તારમન્ત્રાદિરૂઢે ।
સુરવરમુનિવર્યૈઃ પૂજિતે પાત્રહસ્તે
પરમસુખસુખાબ્ધે રેણુકે ત્વં પ્રસીદ ॥

ભૈરવ ઉવાચ

રેણુકાસ્તોત્રમેતત્તે કથિતં ભુવનેશ્વરિ ।
સર્વકામપ્રદં નૃણાં સર્વારિષ્ટવિનાશકૃત્ ॥

સર્વાભીષ્ટકરં દિવ્યં પઠનીયં પ્રયત્નતઃ ।
ઇત્યાગમરહસ્યે વૈ ભૈરવેણ સમીરિતમ્ ॥

ઇતિ શ્ર્યાગમરહસ્યે ભૈરવપ્રોક્તં રેણુકસ્તોત્રં સમ્પૂર્ણમ્ ॥

અથ શ્રીરેણુકામન્ત્રઃ

અસ્ય શ્રીરેણુકામન્ત્રસ્ય શ્રીરુદ્ર ઋષિઃ શ્રીરેણુકાદેવી દેવતા
વિરાટ્ છન્દઃ ક્લીં બીજં શ્રીરેણુકાદેવી શક્તિઃ ક્લીં કીલકં
મમાભીષ્ટસિદ્ધ્યે જપે વિનિયોગઃ ॥

ધ્યાનમ્

પ્રફુલ્લહારકેયૂરકુણ્ડલાદિ વિરાજિતામ્ ।
પ્રસન્નવદનાં શાન્તાં શ્રીદેવીં રેણુકાં ભજે ॥

મન્ત્રઃ
૧। ક્લીં ક્લીં ક્લીં રેણુકાદેવ્યૈ નમઃ ।
૨। ક્લીં ક્લીં ક્લીં સ્વાહા ।
૩। ક્લીં રેણુકાયૈ સ્વાહા ।

ધ્યાનમ્
લોલલ્યાલિલસત્પ્રફુલ્લસુમનો જાલોલ્લસત્કાનને

ભિલ્લીવેષમનઙ્ગવેગજનકં ધૃત્વા ચલન્તી શનૈઃ ।
લોલાપાઙ્ગતરઙ્ગરઙ્ગસુદૃશા સમ્મોહયન્તી શિવં
ચઞ્ચચ્ચઞ્ચલનૂપુરધ્વનિયુતા વર્વર્તિ સર્વાર્થદા ॥

॥ ઇતિ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

.. Renuka Stotram from Agam rahasya ..
was typeset using XƎLaTeX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*